संस्कृत-वार्ता:

01.06.2025

सायम् :- 06:20

<u>मुख्यवार्ता:</u>

- तीव्राया: वर्षाया: अनंतरम् भूस्खलनस्य, गृहस्य च पतनस्य कारणेन सप्तविंशति: जनाः मृता। ऋतुविभागेन आगामिनं सप्तदि यावत् क्षेत्रे प्रचण्डवृष्टिः अनुमिता । श्रीशाह: राज्य-नेतृभि: सह वार्तां कृतवान् आवश्यक-सहयोगाय निगदितवान्।
- गृह-मन्त्रिणा अमित-शाहेन प्रोक्तं यत् केन्द्र-प्रशासनम् आपराधिक-न्याय-प्रणाल्याम् न्यायिक-साक्ष्य-आधारित-दृष्टिकोणाय प्राथमिकतां प्रददाति।
- व्यावसायिक एलपीजी वातेन्धनस्य मूल्यं चतुर्विंशति रुप्यकै: अपचितम् ।
- भारत-मंगोलिया इति अनयो: संयुक्त-सैन्य-अभ्यासस्य नोमैडिक एलीफेंटस्य सप्तदशं संस्करणम् प्रारभ्यते।
- आई.पी.एल. क्रिकेट स्पर्धायाम् अद्य अहमदाबादे मुम्बई इन्डियन्स दलं पंजाब किंग्स दलं च सम्मुखी-करिष्यत:।

<u>पूर्वोत्तर-भूस्खलनम्</u>

तीव्राया: वर्षाया: अनंतरम् भूस्खलनस्य, गृहस्य च पतनस्य कारणेन सप्तविंशति: जनाः मृता:। ऋतुविभागेन आगामिषु सप्तदिनेषु क्षेत्रे प्रचण्डवृष्टिः अनुमिता । पूर्वोत्तर- षट् राज्येषु मध्यमात् प्रचण्डवृष्ट्या सामान्यं जीवनं भृशं प्रभावितम्। अधिकारिभिः पुष्टि: कृता यत् तीव्रया वर्षया भूस्खलनं, गृहपतनम् च जातम्। अनेन कारणेन सप्तविंशति: जनाः मृताः। सप्तविंशति- पीडितेषु अरुणाचलप्रदेशतः नव, मेघालये षट्, असम-मिजोरम-प्रदेशाभ्यां पञ्च-पञ्च, त्रिपुरा-नागालैण्ड्-प्रदेशयोः एक:, एते मृताः। मिजोरमे विगत त्रिदिवसेषु आकस्मिकजलौघस्य भूस्खलनस्य च कारणात् पञ्चजनाः मृताः। श्रीशाह: राज्य-नेतृभि: सह वार्तां कृतवान् आवश्यक-सहयोगाय निगदितवान्।

## ऋतुविभागेन

ऋतुविभागेन आगामिषु सप्तदिवसेषु देशस्य ईशानभागे प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् । एतेन सह दक्षिणप्रायद्वीपीयभारते केरले माहे, कर्णाटके चेत्यत्र बुधवासरपर्यन्तं वज्रपातेन, प्रचण्डवायुना, विद्युत्प्रवाहेन च सह प्रचण्डवृष्ट्याः आशङ्का प्रकटिता। बुधवासरपर्यन्तं जम्मू-कश्मीर-लद्दाख-गिलगित-बाल्टिस्तान-मुजफ्फराबाद-हिमाचलप्रदेश-उत्तरखण्ड-पञ्जाब-हरियाणा-चण्डीगढ-दिल्ली-नगरेषु अपि एतादृशी स्थितिः अनुमीयते। विभागेन आगामिदिनत्रयपर्यन्तं पश्चिमराजस्थाने धूलिकायाः वात्यानां च पूर्वानुमानं कृतम् ।

## अमित-शाह:

गृह-मन्त्रिणा अमित-शाहेन प्रोक्तं यद केन्द्र-प्रशासनम् आपराधिक-न्याय-प्रणाल्याम् न्यायिक-साक्ष्य-आधारित-दृष्टिकोणाय प्राथमिकतां प्रददत् अस्ति। कोलकाताया राजेरहाटे नवीन-केन्द्रीय-न्यायिक-विज्ञान-प्रयोगशाला-भवनम् उद्घाटयन् शाह: प्रोक्तवान् यत् फोरेंसिक मूलभूत-संरचनाया: पुनरुद्धार: अस्य प्रयासस्य महत्वपूर्ण: अंश: अस्ति।

## एलपीजी :

ऊनविंशति किलोग्राम भार युतं व्यावसायिक एलपीजी वातेन्धनस्य मूल्यं अद्यारभ्यात् तैलसमवायैः चतुर्विंशति रुप्यकाणां न्यूनी-कृतम्। एतेषां वातेन्धनानां संशोधितं मूल्यम् अधुना दिल्ल्यां सार्द्ध-त्रयोविंशत्यधिक-सप्तदश शतं रुप्यकम् अस्ति । गृह्य एलपीजी वातेन्धनस्य शुल्कं तथैव भविष्यति। अस्मिन् वर्षे अप्रैलमासे पूर्वं गृह्य-एलपीजी-वातेन्धनस्य मूल्यं एक चत्वारिंशत् रुप्यकाणि यावत् न्यूनी कृतम् ।

## प्रतिनिधि-मण्डलम्

सिन्दूराभियानस्य अन्तर्गतं भारतस्य निरन्तरप्रयासानां भागत्वेन तथा च आतङ्कवादं विरुद्ध्य भारतस्य सिद्धान्तगतस्य दृढनिश्चयस्य च वृत्तेः अनुरूपं संसदसदस्यैः सह सप्त सर्वदलीयप्रतिनिधिमण्डलानि स्वस्य प्रसारकार्यक्रमेण सह विभिन्नेषु देशेषु सन्ति। आतङ्कवादं प्रति शून्यसहिष्णुतायां भारतस्य दृढं सन्देशं प्रतिनिधिमण्डलानि सर्वप्रकारैः प्रकटयन्ति प्रसारयन्ति च। शशि थरूरस्य नेतृत्वे स्थापितं प्रतिनिधिमण्डलं अद्य ब्राजीलदेशस्य आधिकारिकयात्रायां ब्रासिलियानगरं प्राप्तम्। शशि थरूरः अवदत् यत् ते ब्राजील देशे दृढरचनात्मकविमर्शं कर्तुं उत्सुकाः सन्ति। शिवसेनासांसदः श्रीकान्तशिंदे इत्यस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलं लाइबेरियादेशे अस्ति। वार्ताहरैः सह वार्तालापे श्रीशिंदेमहोदयः

भारत-लाइबेरियादेशयोः मध्ये उत्तमः द्विपक्षीयसम्बन्धः वर्तते इति उक्तवान्, आतङ्कवादंविरुद्ध्य शून्यसहिष्णुतायाः विषये भारतस्य सन्देशं लाइबेरियादेशः प्रशंसति इति विश्वासं प्रकटितवान्।

जदयू सांसदः संजयकुमारझा इत्यस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलं इन्डोनेशियादेशस्य सफलयात्रायाः समापनानन्तरं अद्य मलेशियादेशस्य कुआलालम्पुरं प्राप्तवान्। अल्जीरियादेशे भाजपासांसदः बैजयन्तपाण्डा इत्यस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलेन अल्जीरियादेशस्य वार्ताहरान्, थिंक टैंक इति चिन्तनसमूहस्य सदस्यान्, भारतीयप्रवासिनं, अल्जीरियादेशे भारतस्य मित्राणि च आतङ्कवादस्य वैश्विकसमाह्वान-विषये सूचितवन्तः। भाजपेति दलस्य सांसदः रविशंकरप्रसादस्य नेतृत्वे सांसदानां प्रतिनिधिमण्डलं लंदन-नगरं प्राप्तवत्। आतङ्कवादं पराजयितुं भारतस्य निर्विवादप्रतिबद्धतां प्रसारयितुं प्रतिनिधिमण्डलं अस्मिन् मासे तृतीयदिनाङ्क-पर्यन्तं यूके-देशस्य यात्रायाम् अस्ति ।

<u>भारत-मंगोलिया-अभ्यास:</u>

भारत-मंगोलिया इति अनयो: संयुक्त-सैन्य-अभ्यासस्य नोमैडिक एलीफेंटस्य सप्तदशं संस्करणम् प्रारभ्यते। एष: अभ्यास: मंगोलियाया: उलानबटारे संजायते। एष: अभ्यास: जूनमासस्य त्रयोदश दिनाङ्कं यावत् प्रचलिष्यति।

सैन्य-अभ्यासस्य उद्घाटन-समारोहे मंगोलियायाम् भारतस्य राजदूत: अतुल: मल्हारी गोत्सर्वे मंगोलियायाश्च मेजर-जनरल:-लखगवासुरेन गनसलेम: अन्ये च गणमान्या: जना: उपस्थिता: आसन्।

<u>ऑपरेशन सिन्दूर-निबन्ध</u>

अष्टसप्ततितमे स्वातन्त्र्यदिवसस्य अवसरे अद्यतनात् युवप्रतिभानां कृते विविधप्रतियोगितानां आयोजनं प्रशासनेन क्रियते। प्रथमप्रतियोगितायाः विषयः 'ऑपरेशन सिन्दूर - आतङ्कवादं विरुदध्य भारतस्य नीतिं पुनः परिभाषयति' इति । एषा द्विभाषीया निबन्धप्रतियोगिता अस्ति । प्रतियोगितायाः शीर्षाः त्रय: विजेतारः दशसहस्ररूप्यकाणां राशिं प्राप्स्यन्ति। इच्छुकाः प्रतिभागिनः प्रतियोगितायां भागं ग्रहीतुं My Gov इति जालपुटं गन्तुं शक्नुवन्ति। प्रतियोगितायै अस्य मासस्य त्रिंशत् दिनाङ्कपर्यन्तं पटलम् उद्घाटितम् अस्ति।

## उत्तराखण्ड

उत्तराखण्डे चमोली-जनपदस्य उच्चावर्त्यां हिमालय-उपत्यकायां स्थितं यूनेस्को विश्व-धरोहर-स्थलं पुष्पाणां घट्टिका उपत्यका-राष्ट्रिय-उद्यानम् अद्य प्रभृति: पर्यटकेभ्य: प्रकृति-अनुरागिभ्य: उद्घाटितम्। पुष्पवाटिकाया: उद्घाटनस्य प्रथम-दिवसे ऊनपंचाशत्, पर्यटका: सुन्दरीं उपत्यकां सम्प्राप्नुवन्। प्रवेशाय अनुमति: सम्प्रति आभासीयेन-प्रत्यक्षेण च माध्यमेन प्राप्तुं शक्यते।

## आई.पी.एल.

आई.पी.एल. क्रिकेट स्पर्धायाम् अद्य अहमदाबादस्य नरेन्द्र मोदी क्रीडांगणे मुम्बई इन्डियन्स दलं पंजाब किंग्स दलं सम्मुखी-करिष्यत:। अवधेयं यत् क्रीडा इयं सायं सार्ध सप्त वादने भविष्यति। अपि च विजयत्वेन यत् दलं भविष्यति तस्य दलस्य प्रतिस्पर्धा रॉयल चैलेंजर्स बैंगलुरू दलेन साकं नरेन्द्र मोदी क्रीडांगणे मंगलवासरे भविष्यति।

।। इति वार्ता: ।।